# पुण्यश्लोकः खलु श्लोकः

• विद्वान् श्रीरमणशर्मा,
काञ्चीशङ्करमठः, नरूर् अग्रहारः, द्रविडदेशः
विपत्रसङ्केतः - jamadagni@gmail.com

'पुण्यश्लोको नलो राजा' इत्यादिकं पद्यं श्रुतं स्याद् भवद्भिः । नलादीनां श्लोकः कीर्तिः पुण्या मङ्गला, तत्कथनश्रवणस्मरणैः अस्माकं श्रेयो भवतीत्यर्थः । मया तु श्लोकः एव पुण्यश्लोकः इत्युच्यते । तन्नाम 'श्लोकः' इति योऽयं पद्यप्रकारः प्रसिद्धः अस्य कीर्तिरपि मङ्गला संस्कृतवाङ्मये बहुधा व्याप्तत्वात्, अतः तद्विवरणं श्रूयताम् इति ।

**छन्दोबद्धः प्रकारः श्लोकः इति उच्यते । अष्टाक्षरपादचतुष्टययुक्तः अनुष्टुप्छन्दसः अवान्तरभेदः अपि श्लोकः एव । श्लोकः नाम कीर्तिः इत्यपि । पद्यप्रकारभूतः 'श्लोकः' एव 'पुण्यश्लोकः' । तन्नाम 'श्लोकः' इति योऽयं पद्यप्रकारः प्रसिद्धः अस्य कीर्तिरपि मङ्गला संस्कृतवाङ्मये बहुधा व्याप्तत्वात्, अतः तद्विवरणम् उपस्थाप्यते अत्र ।**

लोकव्यवहारे बहवः पद्यसामान्ये अर्थे श्लोकः इति शब्दं प्रयुञ्जते, विशेषतः देवस्तोत्रादौ । तथा च 'श्लोको यशसि पद्ये च' इति कोशः । तत्र तु श्लोकते स्तौति अनेन इत्यादिरीत्या व्युत्पत्तिः । अत्र तु अष्टाक्षरपादचतुष्टययुक्तस्य द्वात्रिंशदक्षरस्य अनुष्टुप्छन्दसः अवान्तरभेदः श्लोक इत्याख्यः पद्यविशेषः एव विवक्षितः । तथा हि उपर्युक्तमेव पद्यं परिशीलयन्तु तावद् भवन्तः । अत्र हि -

(१) पुण्यश्लोको नलो राजा (२) पुण्यश्लोको युधिष्ठिरः ।
(३) पुण्यश्लोका च वैदेही (४) पुण्यश्लोको जनार्दनः ।।

इति चत्वारः अष्टाक्षराः पादाः वर्तन्ते । परन्तु न एतावदेव श्लोकस्य लक्षणं, यतो हि इदं पद्यमपि तादृशमेव -

(१) यामुनसैकतदेशे (२) गोपवधूजलकेलौ ।
(३) कंसरिपोर्गतिलीला (४) चित्रपदा जगद् अव्यात् ।।

परन्तु अयं श्लोको न भवतीति स्पष्टं पठनानुभववताम् । अतः श्लोकस्य लक्षणं किमपि वर्तते, तच्च अत्र अनन्तरोक्ते पद्ये नास्ति इति निश्चितम् । तस्यैव श्लोकलक्षणस्य निरूपणम् अस्मिन् लेखने क्रियते ।

अत्र च लेखने आधारः पद्यस्वरूपनिरूपणार्थमेव प्रवृत्तं छन्दश्शास्त्रमेव । परन्तु अत्र तच्छास्त्रगतानां सर्वेषां प्रधानविषयाणां परिचयो न कार्यते । प्रकृतविषयनिरूपणार्थं यावत् वक्तव्यं तावदेव उच्यते । विस्तरस्तु छन्दोमञ्जरी-वृत्तरत्नाकरादौ, ततोऽपि वा मूलभूते पिङ्गलाचार्यविरचिते छन्दस्सूत्रग्रन्थे सवृत्तिके द्रष्टव्यः ।

## लघुगुरुभावस्य गणानां च परिचयः

श्लोकस्य लक्षणं वक्तुं प्रथमतः लघुगुरुलक्षणम् उच्यते । तच्च अतीव सरलतया भगवता पाणिनिना एव उक्तम् (पा सू १/४/१०-१२) - 'ह्रस्वं लघु', 'संयोगे गुरु', 'दीर्घं च' इति । तन्नाम यत्र अक्षरे स्वरः ह्रस्वः तद् लघु इत्युच्यते, यथा 'शमः' इत्यत्र 'श' इति । परन्तु यदि परतः संयोगः भवति तदा तद् गुरु, न तु लघु, यथा 'शक्तिः' इत्यत्र 'श' इति । यत्तु दीर्घस्वरम् अक्षरं तत् सर्वदा गुरु, यथा 'रामः' 'राद्धम्' इत्युभयत्र 'रा' इति । अयोगवाहपरमपि संयुक्तपरम् इति गृह्यते - अतः 'कंसः' 'दुःखम्' इत्यादौ 'क' 'दु' इत्यादीनि अक्षराणि गुरूण्येव ।

छन्दःशास्त्रे लघ्वक्षरस्य एका मात्रा, गुर्वक्षरस्य द्वे मात्रे इति परिगणना । (अक्षरान्तर्गतानां स्वराणां व्यञ्जनानां च शिक्षाव्याकरणयोः प्रसिद्धः प्रत्येककालस्तु नात्र पुरस्क्रियते इति विशेषोऽवधेयः ।) अपि च लघुनः '।' इति (दण्ड)चिह्नेन, गुरुणश्च 'ऽ' इति (अवग्रह)चिह्नेन सूचनं क्रियते इति सम्प्रदायः ।

अथ त्रिभिस्त्रिभिः अक्षरैः एको गणः परिगण्यते । लघुगुरुभावेन द्विविधानाम् अक्षराणां त्रिषु स्थानेषु विन्यासस्य संहत्य २ X २ X २ = ८ प्रकाराः सम्भवन्ति । तेषां म-य-र-स-त-ज-भ-न इति संज्ञाः । तेषां च सुखेन स्मरणाय अयं सरलः श्लोकः (पुनः श्लोकः !) भवति -

आदिमध्यावसानेषु य-र-ता यान्ति लाघवम् । भ-ज-सा गौरवं यान्ति म-नौ तु गुरुलाघवम् ।।

तन्नाम य-र-त-गणानां क्रमेण आदौ मध्ये अन्ते च लघुत्वं भवति, तन्नाम इतरत्र गुरुत्वं भवति । तथा



पिङ्गलाचार्यः

भ-ज-स-गणानाम् आदौ मध्ये अन्ते च गुरुत्वं भवति, तन्नाम इतरत्र लघुत्वं भवति । म-न-गणयोस्तु सर्वत्र गुरुत्वं लघुत्वं च भवति । तेन इदं सिद्धम् -

य = ।ऽऽ, र = ऽ।ऽ, त = ऽऽ।

भ = ऽ।।, ज= ।ऽ।, स = ।।ऽ

म = ऽऽऽ, न = ।।।

## श्लोकस्य लोकप्रसिद्धं लक्षणम्

यस्य पद्यस्य संहत्य द्वात्रिंशद् अक्षराणि भवन्ति तत्र अनुष्टुप् नाम छन्दः इत्युच्यते । तच्च प्रायेण चतुर्षु अष्टाक्षरेषु पादेषु व्यवस्थितं भवति । एवं सति श्लोकाख्यस्य तत्प्रकारविशेषस्य इदं लक्षणम् उच्यते छन्दोमञ्जर्याख्ये ग्रन्थे -

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयात् शेषेष्वनियमो मतः ।।

अस्य च अर्थः स्पष्टः यत् - सर्वेषु पादेषु पञ्चमं लघु भवेत्, षष्ठं च गुरु; सप्तमं तु प्रथमतृतीययोः गुरु द्वितीयचतुर्थयोः लघु च भवेत् इति । तथा लेखनस्य आदौ उक्तं पुण्यश्लोकपद्यं परिशीलयामश्चेत् -

ऽऽऽऽ ।ऽऽ ऽ - ऽऽऽऽ ।ऽ। ऽ - -
ऽऽऽऽ ।ऽऽ ऽ - ऽऽऽऽ ।ऽ। ऽ - -

इति प्रस्तारः (लघुगुरुविन्यासविशेषः) लभ्यते । अत्र च उक्तानि सर्वाणि लक्षणानि सन्ति । अतः इदं श्लोक एवेति निश्चितम् । 'यामुनसैकतदेशे' इति पद्ये तु इदं लक्षणं नास्तीत्यपि एवमेव परीक्ष्य ज्ञातुं शक्यते ।


एवमेव 'धर्मक्षेत्रे ....' इति गीतायाः पद्यमपि श्लोकलक्षण-युक्तमिति निश्चेतुं शक्यते । तथा 'शुक्लाम्बरधरं...', 'वक्रतुण्ड...' इत्यादीनि लोकप्रसिद्धानि अन्यान्यपि । तथा रामायणमहाभारते, पुराणानि, शास्त्रग्रन्थाः इत्येषां, किंबहुना संस्कृतपद्यवाङ्मयस्यैव भूयान् भागः श्लोकरूपेण एव निबद्धः वर्तते ।

अस्मिंश्च श्लोकस्य अत्यन्तप्रचारे प्रधानं कारणम् उत्पश्यामः यत् समस्ते पद्ये केषाञ्चन एव अक्षराणां (तन्नाम प्रतिपादम् अष्टसु त्रयाणामेव) लघुगुरुभावनियमः कृतः, अन्येषु तु प्रायेण अनियमः वर्तते । अतः भाषायां काञ्चन मध्यमां व्युत्पत्तिं प्राप्ताः अपि श्लोकरूपेण पद्यानि रचयितुं प्रभवन्ति । (एतावता तु तस्य महिमा न हीयते, उक्तरीत्या बहूनां पूज्यग्रन्थानां तस्मिन्नेव निबद्धत्वात्, बहुभिश्च महात्मभिः महापण्डितैश्च बहुधा प्रयुक्तत्वात् ।)

## श्लोकरूपपद्यप्रकारस्य उत्पत्तेः कथा

अत्र प्रसङ्गाद् श्लोकस्य उत्पत्तौ कथा काचन सङ्क्षिप्य उच्यते । तथा हि अस्य श्लोकरूपपद्यप्रकारस्य आविष्कर्ता आदिकवित्वेन प्रसिद्धः वाल्मीकिरेव इति भासते । तथा हि रामायणे बालकाण्डे द्वितीयसर्गे, क्रौञ्चमिथुनस्य पुमांसं व्याधेन हतं पश्यति वाल्मीकिः -

ततः करुणवेदित्वाद् अधर्मोऽयमिति द्विजः ।
निशाम्य रुदतीं क्रौञ्चीम् इदं वचनमब्रवीत् ।।
मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।
तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकेनार्तस्य शकुनेः किमिदं व्याहृतं मया ।।


वाल्मीकिः

चिन्तयन् स महाप्राज्ञः चकार मतिमान् मतिम् ।
शिष्यं चैवाब्रवीद् वाक्यमिदं स मुनिपुङ्गवः ।।
पादबद्धोऽक्षरसमः तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ।।

अत्र च वाल्मीकिः स्वमुखाद् निस्सृतस्य वाक्यस्य पादबद्धत्वम् अक्षरसमत्वं (सर्वेषु पादेषु समाक्षरयुक्तत्वं) तन्त्रीलयसमन्वितत्वम् इत्येतान् गुणान् नूतनानिव विमृशन् स्फुटं लक्ष्यते । यदि नाम अयं विशिष्टः पद्यप्रकारः ततः पूर्वमेव आविष्कृतः स्याद् तदा नूतनमिव विमर्शनीयं न भवेत् । अतः श्लोकाख्यः वृत्तविशेषः वाल्मीकिना इत्थम् आविष्कृतः इति वक्तुम् अवकाशोऽस्ति । यद्यपि वेदेऽपि अनुष्टुप्छन्दोबद्धाः मन्त्राः बहवो वर्तन्ते (तेषु च केचन यदृच्छया एतल्लक्षणलक्षिताः स्युः) तथाऽपि लौकिकपद्येषु अस्याः रीतेः व्यवस्थितरूपेण आविष्करणं वाल्मीकेरिति वक्तुं शक्यते ।

अत्र च वाल्मीकिमुखाद् निःसृतस्य 'मा निषाद ...' इति पद्यस्य पूर्वोक्तश्लोकलक्षणसमन्वयो भवत्येव यथा -

ऽ।ऽऽ ।ऽऽ । - ।।ऽऽ ।ऽ। ऽ - -
ऽऽ।। ।ऽऽ । - ।।ऽऽ ।ऽ। ऽ - -

किञ्च इदं पद्यं न केवलं व्याधस्य निन्दा, प्रत्युत भगवतः श्रीरामस्य श्लोकः स्तुतिरेव इत्यर्थे श्लोको भवतु इत्यत्र प्रथमतः प्रयुक्तः अयं श्लोकशब्दः अस्मिन्नेव पद्यप्रकारविशेषे रूढोऽभवदिति भाति । अतः पुनः यद्यपि वेदेऽपि श्लोकशब्दस्य प्रयोगः कीर्तिः अथवा स्तुतिः इत्यर्थे बहुधा वर्तते, तथापि पद्यविशेषवाचकत्वेन तस्य प्रयोगः वाल्मीकेः परं जातः स्यादिति ।

अग्रे च वाल्मीक्याश्रमम् आगतो ब्रह्मा श्लोकत्वम् अनुगृह्णाति इत्यपि तत्रैव रामायणे -

... तमुवाच ततो ब्रह्मा प्रहसन् मुनिपुङ्गवम् ।।
श्लोक एवास्त्वयं बद्धो नात्र कार्या विचारणा । ...

अत्र च प्रकरणे व्याख्यातृभिः बहु पराक्रान्तमिति विस्तराद् विरम्यते ।

## श्लोकलक्षणस्य बहुत्र असमन्वयः

प्रकृते श्लोकस्य लक्षणम् अस्माभिः ज्ञातम् । परन्तु सर्वेषु श्लोकतया विभाव्यमानेषु पद्येषु इदं लक्षणं न समन्वेति । तथा हि अस्यैव रामायणस्य सर्वप्रथमं पद्यं भवति –

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।।

अत्र प्रथमपादे ।ऽऽऽ ।।। ऽ इति प्रस्तारो भवति । अत्र च षष्ठ-सप्तमयोः यद् गुरुत्वं भवेत् तन्नास्तीति स्पष्टम् । एवमेव रघुवंशे प्रथमसर्गे –

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना ।।

इत्यत्रापि प्रथमपादे । तथा तत्रैव –

तव मन्त्रकृतो मन्त्रैर्दूरात् संशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ।।

इत्यत्र तृतीयपादे ऽऽऽऽ ।।। ऽ इति वर्तते । एवमेव अपरस्मिन्नपि प्रसिद्धे श्लोके –

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युः तन्नमामि गजाननम् ।।

इत्यत्र । एषु सर्वेषु उदाहरणेषु प्रथमे तृतीये वा पादे षष्ठसप्तमयोः अपेक्षितम् गुरुत्वं नास्ति ।

पुनरपि रघुवंशे –

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ।।

इत्यत्र प्रथमपादे ।ऽ।ऽ ऽऽऽ ऽ इति प्रस्तारे पञ्चमस्य लघुत्वं नास्ति । तथा तत्रैव –

अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ।।

इत्यत्र तृतीयपादेऽपि ।

तथैव तर्कसङ्ग्रहदीपिकामङ्गले –

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।
टीकां शिशुहितां कुर्वे तर्कसङ्ग्रहदीपिकाम् ।।

इत्यत्र प्रथमपादे ऽऽ।ऽ ऽ।ऽ ऽ इति प्रस्तारे पञ्चमस्य लघुत्वं षष्ठस्य गुरुत्वं च नास्ति ।

अन्यान्यपि उदाहरणानि सुबहुशः काव्येषु अन्येषु च प्राचीन-ग्रन्थेषु श्लोकाः लभ्यन्ते । एते च सर्वे श्लोकाः इत्येव कथ्यन्ते । अत्र श्लोकलक्षणाभावे श्लोकत्वं कथम् ?

## श्लोकः वक्त्रम् इति पर्यायशब्दौ वृत्तविशेषवाचकौ

पूर्वोक्तं यत् छन्दोमञ्जरीगतं लक्षणं तत्र अग्रिमवाक्यं वर्तते –

प्रयोगे प्रायिकं प्राहुः केऽप्येतद् वक्त्रलक्षणम् ।

इति । तन्नाम इदं लक्षणं प्रायिकमेव, न तु सार्वत्रिकं, तथाऽपि केचिद् एतादृशं लक्षणं वदन्ति इत्यर्थः ।

ननु अत्र वाक्ये वक्त्रलक्षणम् इति वर्तते, न तु श्लोकलक्षणम् इति ? अत्रोच्यते, श्लोकश्च वक्त्रं च समानमेवेति श्रुतबोधाख्यस्य अपरस्य च्छन्दःपरिचयग्रन्थस्य परिशीलनेन ज्ञायते । तथा हि तत्र पठ्यते –

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ।।
पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयाद् एतत् पद्यस्य लक्षणम् ।।

इति । एतौ द्वौ श्लोकौ एकमेव विषयं शब्दान्तरेण भाषेते । प्रथमे श्लोके ह्रस्वदीर्घशब्दौ लघुगुरुपरौ इति वक्तव्यं द्वितीयश्लोक-संवादाय । तथा द्वितीये श्लोके पद्यशब्दः प्राचुर्यात् श्लोकपरः इति वक्तव्यम् । एवं शब्दव्याकुलतायामपि अनेन ग्रन्थेनैव (न पूर्वोक्तैः कैरपि) अस्य पद्यविशेषस्य श्लोकः इति अभिधानं कृतं दृश्यते (वाल्मीक्यनुसरणेन) । छन्दोमञ्जर्यां तु एतद् वक्त्रस्य लक्षणम् इत्युक्तम् । अतः वक्त्रं श्लोकश्च एकमेव इति ज्ञायते ।

प्रकृते च छन्दोमञ्जर्यां व्यक्तमेव पूर्वोक्तं लक्षणं प्रायिकम् इति अभिहितम् । श्रुतबोधेऽपि यद् लक्षणं तत् प्राथमिकपरिचयार्थमेव । तथा हि श्रुतबोधस्य आदावेव –

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ।।

इत्युक्तम् । अत्र अविस्तरेति शब्दो ध्येयः । अतः वास्तवं लक्षणं गुरुतरेभ्यो ग्रन्थेभ्यः ज्ञेयम् ।

## श्लोकस्य सूक्ष्मतरं लक्षणम्

तथा च छन्दस्सूत्रेषु सवृत्तिकेषु वृत्तरत्नाकरे च 'वक्त्रप्रकरणम्' इत्यत्र पृथग् अयं विषयः उपन्यस्तः । यद् अस्माभिः श्लोक इति कथ्यते तस्य मूलभूते छन्दश्शास्त्रे नाम भवति 'वक्त्रम्' इति । वक्तॄणां वक्त्रे सौख्यम् आवहतीति भावनया एवं नाम कृतं स्याद् ! अयं च पूर्वोक्तस्वरूपस्य अनुष्टुप्छन्दसः अवान्तरप्रकारः ।

वक्त्रस्य विवरणे क्रियमाणे प्रतिपादं विद्यमानानि अष्टौ अक्षराणि एवं विभज्यन्ते – प्रथमाक्षरं, ततः द्वौ त्र्यक्षरौ गणौ, अष्टमाक्षरम् इति । अत्र च प्रथमम् अन्त्यं च अक्षरं लक्षणे न गण्यते, तन्नाम तस्य लघुगुरु-भावो न नियम्यते । तद् विहाय मध्यमयोः त्र्यक्षरयोः गणयोः अधोनिर्दिष्टौ नियमौ वर्तेते सर्वत्र वक्त्रे ।

१) कस्मिन्नपि पादे प्रथमः गणः सगणः (।।ऽ) नगणः (।।।) वा न भवेत् ।

२) युग्मपादयोः (द्वितीयचतुर्थयोः) सः प्रथमः गणः रगणः (ऽ।ऽ) अपि न भवेत् ।

(अतः 'शेषेष्वनियमो मतः' इति छन्दोमञ्जरीलक्षणे उक्तमपि प्रायिकमेव ।) सम्प्रति उक्तनियमद्वयोपरि विशेषणानां परिवर्तनेन वक्त्रस्य प्रभेदाः लभ्यन्ते । (वक्ष्यमाणानि उदाहरणानि प्राधान्येन पिङ्गलच्छन्दस्सूत्राणां हलायुध-विरचितायाः वृत्तेः उद्धतानि, '*' इति नक्षत्रचिह्नयुक्तानि तु मदीयानि ।)

## वक्त्रस्य (श्लोकस्य) प्रभेदाः

३) सर्वेषु पादेषु द्वितीयः गणः यगणः (।ऽऽ) भवति चेत् तत् केवलं वक्त्रम् । अस्य उदाहरणम् –

दुर्भाषितेऽपि सौभाग्यं प्रायः प्रकुरुते प्रीतिः ।
मातुर्मनो हरन्त्येव दौर्लालित्योक्तिभिर्बालाः ।।

अत्र च प्रस्तारः -

ऽ ऽ।ऽ (र) ।ऽऽ (य) ऽ - ऽ ऽ।। (भ) ।ऽऽ (य) ऽ - -

ऽ ऽ।ऽ (र) ।ऽऽ (य) । - ऽ ऽऽऽ (म) ।ऽऽ (य) ऽ - -

इदं च प्रसिद्धात् श्लोकलक्षणाद् युग्मपादयोः भिद्यते । यतः अत्र सप्तमम् अक्षरं गुरु भवति । तच्च अनुपदं परिह्रियते -

४) वक्त्रे युग्मपादयोः द्वितीयः जगणः (।ऽ।) भवति चेत् तत् पथ्यावक्त्रम् ।

इदं पथ्यावक्त्रमेव प्रसिद्धश्लोकलक्षणानुगुणम् । यथा अस्य (भूयोऽप्येकम्) उदाहरणम् -

नित्यं नीतिनिषण्णस्य राज्ञो राष्ट्रं न सीदति ।
न हि पथ्याशिनः काये जायन्ते व्याधिवेदनाः ।।

अत्र प्रस्तारः -

ऽ ऽऽ। (त) ।ऽऽ (य) । - ऽ ऽऽऽ (म) ।ऽ। (ज) । - -

।।ऽऽ (य) ।ऽऽ (य) ऽ ऽ ऽऽऽ (म) ।ऽ। (ज) ऽ - -

अतश्च प्रसिद्धानि सर्वाणि पूर्वोक्तश्लोकलक्षणलक्षितानि पद्यानि वस्तुतः पथ्यावक्त्राख्ये अनुष्टुप्छन्दसः अवान्तरप्रकारे अन्तर्भवन्ति ।

परमपि एतावता पूर्वोक्तः 'तपःस्वाध्याय....' इत्यादिषु श्लोकतया प्रसिद्धेषु श्लोकलक्षणस्य असमन्वयः इत्येवंरूपो दोषः न परिहृतः । अतः भूयोऽपि श्रूयताम् ।

५) वक्त्रे अयुग्मपादयोः द्वितीयः जगणः (।ऽ।) भवति चेत् तद् विपरीतपथ्यावक्त्रम् ।

आचार्याय प्रियं धनम् आहृत्य व्रजगार्हस्थ्यम् ।
श्रद्धालुर्गृहिणीयुत आतिष्ठ विहितं धर्मम् ।। *

ऽ ऽऽऽ (म) ।ऽ। (ज) । - ऽ ऽऽ। (त) ।ऽऽ (य) ऽ - -

ऽ ऽऽ। (त) ।ऽ। (ज) । - ऽ ऽ।। (भ) ।ऽऽ (य) ऽ - -

६) वक्त्रे अयुग्मपादयोः द्वितीयः नगणः (।।।) भवति चेत् तत् चपलावक्त्रम् ।

उह्यमानां स्वशिबिकां विषमं स नृपो दृष्ट्वा ।
रहूगणः कुत इति कुपितो भृत्यकान् आह ।।*

ऽ ।ऽऽ (य) ।।। (न) ऽ - । ।ऽ। (ज) ।ऽऽ (य) ऽ - -

। ऽ।ऽ (र) ।।। (न) । - । ।ऽऽ (य) ।ऽऽ (य) । - -

अतः परं विपुला इत्यवान्तरप्रकरणम् आरभ्यते । अत्र च पथ्यावक्त्रम् आधारत्वेन गृह्यते । (अतः विपुला इति स्त्रीलिङ्गकः शब्दः पथ्यायाः विशेषणं भासते ।) तथा हि वक्ष्यमाणेषु पथ्यावक्त्रवद् युग्मपादे द्वितीयः जगणो नियतः । अयुग्मयोः पादयोः एकस्मिन् वा पादे यगणभिन्नः कश्चन द्वितीयस्थाने भवेत् । तेन च पथ्यावक्त्राद् भेदः । तथा च -

७) वक्त्रे युग्मपादयोः द्वितीयः जगणः (।ऽ।) भवति, परन्तु तत् पथ्यावक्त्रे न भवति चेत् सा विपुला । (इयं च क्वचिद् युग्मविपुला इत्युच्यते ।) अस्याश्च वक्ष्यमाणाः प्रकाराः भवन्ति ।

८) विपुलायां सर्वेषु पादेषु द्वितीयः जगणः भवति चेत् सा केवला विपुला ।

सैतवेन पथार्णवं तीर्णो दशरथात्मजः ।
रक्षःक्षयकरीं पुनः प्रतिज्ञां स्वेन बाहुना ।।

ऽ ।ऽ। (ज) ।ऽ। (ज) ऽ - ऽ ऽ।। (भ) ।ऽ। (ज) ऽ - -

ऽ ऽ।। (भ) ।ऽ। (ज) ऽ - । ऽऽऽ (म) ।ऽ। (ज) ऽ - -

९) विपुलायाम् अयुग्मपादयोः यगणाद् भिन्नः यो गणःद्वितीयस्थाने वर्तते तन्नाम्ना सा विपुला भवति । अत्र च यगणभिन्नो गणः अयुग्मपादयोः उभयत्र स्यात्, एकत्र वा । आधिक्येन एकत्रैव दृश्यते ।

यथा 'तपःस्वाध्याय' इत्यत्र प्रथमपादे । ऽऽऽ (म) ।।। (न) ऽ इति प्रस्तारो भवतीत्यतः एषा नविपुला 'अनाकृष्टस्य-विषयैः...','तव मन्त्रकृतो मन्त्रैः ....' इत्यादावपि सैव । एवं 'मनोभिरामाः शृण्वन्तौ...', 'अदूरवर्तिनीं सिद्धिम्...' इत्यत्र च मविपुला, 'विश्वेश्वरं साम्बमूर्तिम्....' इत्यत्र रविपुला । एवमन्यत्र अन्यान्या च अनुसन्धेया ।

१०) विपुलायाम् अयुग्मपादयोः यगणाद् भिन्नौ द्वौ गणौ द्वितीयस्थाने भवतश्चेत् सा तयोः सङ्कीर्णविपुला भवति । यथा -

तं प्रणौमि मम गुरुं कामाक्षीचरणार्चकम् ।
दयालुं समन्दहासं काञ्चीपीठनिवासिनम् ।।

ऽ ।ऽ। (ज) ।।। (न) ऽ - ऽ ऽऽ। (त) ।ऽ। (ज) ऽ - -

। ऽऽ। (त) ऽ।ऽ (र) ऽ - ऽ ऽऽ। (त) ।ऽ। (ज) ऽ - -

अत्र प्रथमपादे द्वितीयतया नगणः, तृतीयपादे च रगणः वर्तते इत्यतः एषा तयोः सङ्कीर्णविपुला ।

## उपसंहारः

अन्ततः सर्वस्य परीक्षणेन एतावद् ज्ञायते - यदेव वक्त्रम् इति छन्दश्शास्त्रे उक्तं तदेव लोके 'श्लोकः' इति प्रसिद्धम् । अतश्च यद्यपि श्लोकस्य प्रधानः प्रकारः पथ्यावक्त्रमेव (तत्र चैव प्रसिद्धं लक्षणं सम्भवति), तथापि विपुलादीनाम् इतरेषामपि वक्त्रप्रकाराणां सत्त्वाद् तादृशलक्षणयुक्तान्यपि पद्यानि श्लोकत्वेन अङ्गीक्रियन्ते व्यवह्रियन्ते च । किञ्च वक्त्रलक्षणे प्रथमगणस्थाने कस्यापि गणस्य विधेः अभावेऽपि स-न-र-गणानां निषेधः वर्तते इत्यतः वक्त्रापरपर्यायस्य श्लोकस्य लक्षणं (पथ्यावक्त्रमात्रविचारे क्रियमाणेऽपि) न केवलं पञ्चमषष्ठसप्तमेषु अक्षरेषु आयत्तं भवति, प्रत्युत द्वितीयतृतीयचतुर्थेषु अपि इति स्मर्तव्यम् ।

अयि भोः संस्कृताभिमानिनः ! आशासे सर्वेणानेन विस्तृत-विवरणेन पद्यविरचनप्रयत्नात् मा भीः जायतां युष्मासु ! स्मर्तुम् अर्हथ यद् युष्माभी रचितं पद्यं यद्यपि वक्त्रं वा पथ्यावक्त्रं वा विपुला वा न स्याद्, अष्टाक्षरपादचतुष्कव्यवस्थितं चेद् निश्चयेन अनुष्टुप्छन्दसि अन्तर्भवत्येव ! वेदे चापि 'एष श्लोको भवति' इति प्रस्तुताः बहवो मन्त्राः न पूर्वोक्तेषु प्रकारेषु अन्तर्भवन्ति । अतः क्रमेण प्रयतमानाः प्रथमतः अक्षरसङ्ख्यानियमम् अभ्यस्य ततो लघुगुरुनियमं परिपाल्य वक्त्रलक्षणयुक्तानि शास्त्रीयाणि श्लोकपद्यानि रचयितुं शक्ष्यथ ।

व्याकरणवच्च हि छन्दस्यपि कूपखानकन्यायः एव - 'कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्च अवकीर्णो भवति, सोऽप्सु सञ्जातासु तं गुणम् आसादयति, येन स च दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति' इति महाभाष्यकारेण उक्तया विधया । एवं 'पद्ये पद्ये छन्दसां स्याद् विशुद्धिः' इति मन्यमानाः संस्कृतभाषायाः अतिसुन्दरे अस्मिन्नपि प्रकारे धैर्येण प्रवर्तध्वं, स्वीयं भाषासौष्ठवं च वर्धयध्वम् !